योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०८०

अशीतितमः सर्गः ८०

श्रीवसिष्ठ उवाच ।

एवमात्मनि विश्रान्तां वदन्तीं तां वराननाम् ।

अबुद्ध्वा तद्गिरामर्थं विहस्योवाच भूपतिः ।। १

शिखिध्वज उवाच ।

असंबद्धप्रलापासि बालासि वरवर्णिनि ।

रमसे राजलीलाभी रमस्वावनिपात्मजे ।। २

किंचित्त्यक्त्वा नकिंचिद्यो गतो प्रत्यक्षसंस्थितम् ।

त्यक्तप्रत्यक्षसद्रूपः स कथं किल शोभते ।। ३

भोगैरभुक्तैस्तुष्टोऽहमिति भोगान्जहाति यः ।

रुषेवासनशय्यादीन्स कथं किल शोभते ।। ४

भोगाभोगे परित्यज्य खे शून्ये रमते तु यः ।

एक एवाखिलं त्यक्त्वा स कथं किल शोभते ।। ५

वसनाशनशय्यादीन्सर्वान्संत्यज्य धीरधीः ।

यस्तिष्ठत्यात्मनैवैकः स कथं किल शोभते ।। ६

नाहं देहोऽन्यथा चाहं नकिंचित्सर्वमेव च ।

एवं प्रलापो यस्यास्ति स कथं किल शोभते ।। ७

यत्पश्यामि न पश्यामि तत्पश्याम्यन्यदेव यत् ।

प्रलाप इत्यसंन्यस्य स कथं किल शोभते ।। ८

तस्माद्बालासि मुग्धासि चपलासि विलासिनि ।

नानालापविलासेन क्रीडामि क्रीड सुन्दरि ।। ९

प्रविहस्याट्टहासेन शिखिध्वज इति प्रियाम् ।

मध्याह्ने स्नातुमुत्थाय निर्जगामाङ्गनागृहात् ।। १०
कष्टं नात्मनि विश्रान्तो मद्वचांसि न बुद्धवान् ।
राजेति खिन्ना चूडाला स्वव्यापारपराभवत् ।। ११
तदा तथाङ्ग तत्राथ तादृगाशययोस्तयोः ।
ताभिः पार्थिवलीलाभिः कालो बहुतिथो ययौ ।। १२
एकदा नित्यतृप्ताया निरिच्छाया अपि स्वयम् ।
चूडालाया बभूवेच्छा लीलया खगमागमे ।। १३
खगमागमसिद्ध्यर्थमथ सा नृपकन्यका ।
सर्वभोगाननादृत्य समागम्य च निर्जनम् ।। १४
एकैवैकान्तनिरता स्वासनावस्थिताङ्गिका ।
ऊर्ध्वगप्राणपवनचिराभ्यासं चकार ह ।। १५
श्रीराम उवाच ।
यदिदं दृश्यते किंचिज्जगत्स्थावरजंगमम् ।
स्पन्दच्युतं क्रियानाम्नः कथमित्यनुभूयते ।। १६
कस्य स्पन्दविलासस्य घनाभ्यासस्य मे वद ।
ब्रह्मन्खगमनाद्येतत्फलं यत्नैकशालिनः ।। १७
आत्मज्ञो वाप्यनात्मज्ञः सिद्ध्यर्थे लीलयाथवा ।
कथं संसाधयत्येतद्यथा तद्वद मे प्रभो ।। १८
श्रीवसिष्ठ उवाच ।
त्रिविधं संभवत्यङ्ग साध्यं वस्त्विह सर्वतः ।
उपादेयं च हेयं च तथोपेक्ष्यं च राघव ।। १९
आत्मभूतं प्रयत्नेन उपादेयं च साध्यते ।
हेयं संत्यज्यते ज्ञात्वा उपेक्ष्यं मध्यमेतयोः ।। २०
यद्यदाह्लादनकरमादेयं तच्च सन्मते ।
तद्विरुद्धमनादेयमुपेक्ष्यं मध्यमं विदुः ।। २१
सन्मतेर्विदुषो ज्ञस्य सर्वमात्ममयं यदा ।

त्रय एते तदा पक्षाः संभवन्ति न केचन ।। २२

केवलं सर्वमेवेदं कदाचिल्लीलया तया ।

उपेक्षापक्षनिक्षिप्तमालोकयति वा न वा ।। २३

ज्ञस्योपेक्षात्मकं नाम मूढस्यादेयतां गतम् ।

हेयं स्फारविरागस्य श्रृणु सिद्धिक्रमः कथम् ।। २४

देशकालक्रियाद्रव्यसाधनाः सर्वसिद्धयः ।

जीवमाह्लादयन्तीह वसन्त इव भूतलम् ।। २५

मध्ये चतुर्णामेवैषां क्रियाप्राधान्यकल्पना ।

सिद्ध्यादिसाधने साधो तन्मयास्ते यतः क्रमाः ।। २६

गुटिकाञ्जनखड्गादिक्रियाक्रमनिरूपणम् ।

तत्रासतां च दोषोऽत्र विस्तारः प्रकृतार्थहा ।। २७

रत्नौषधितपोमन्त्रक्रियाक्रमनिरूपणम् ।

आस्तामेव किलैषोऽपि विस्तारः प्रकृतार्थहा ।। २८

श्रीशैले सिद्धदेशे च मेर्वादौ वा निवासतः ।

सिद्धिरित्यपि विस्तारः कृतार्थ प्रकृतार्थहा ।। २९

तस्माच्छिखिध्वजकथाप्रसङ्गपतितामिमाम् ।

प्राणादिपवनाभ्यासक्रियां सिद्धिफलां श्रृणु ।। ३०

अन्तस्था ह्यखिलास्त्यक्त्वा साध्यार्थेतरवासनाः ।

गुदादिद्वारसंकोचान्स्थानकादिक्रियाक्रमैः ।। ३१

भोजनासनशुद्ध्या च साधुशास्त्रार्थभावनात् ।

स्वाचारात्सुजनासङ्गात्सर्वत्यागात्सुखासनात् ।। ३२

प्राणायामघनाभ्यासाद्राम कालेन केनचित् ।

कोपलोभादिसंत्यागाद्भोगत्यागाच्च सुव्रत ।। ३३

त्यागादाननिरोधेषु भृशं यान्ति विधेयताम् ।

प्राणाः प्रभुत्वात्तज्ज्ञस्य पुंसो भृत्या इवाखिलाः ।। ३४

राज्यादिमोक्षपर्यन्ताः समस्ता एव संपदः ।

देहानिलविधेयत्वात्साध्याः सर्वस्य राघव ।। ३५

परिमण्डलिताकारा मर्मस्थानं समाश्रिता ।

आन्त्रवेष्टनिका नाम नाडी नाडीशताश्रिता ।। ३६

वीणाग्रावर्तसदृशी सलिलावर्तसंनिभा ।

लिप्यार्धौकारसंस्थाना कुण्डलावर्तसंस्थिता ।। ३७

देवासुरमनुष्येषु मृगनक्रखगादिषु ।

कीटादिष्वब्जजान्तेषु सर्वेषु प्राणिषूदिता ।। ३८

शीतार्तसुप्तभोगीन्द्रभोगवद्बद्धमण्डला ।

सिता कल्पाग्निविगलदिन्दुवद्बद्धकुण्डली ।। ३९

ऊरोर्भ्रूमध्यरन्ध्राणि स्पृशन्ती वृत्तिचञ्चला ।

अनारतं च सस्पन्दा पवमानेन तिष्ठति ।। ४०

तस्यास्त्वभ्यन्तरे तस्मिन्कदलीकोशकोमले ।

या परा शक्तिः स्फुरति वीणावेगलसद्गतिः ।। ४१

सा चोक्ता कुण्डलीनाम्ना कुण्डलाकारवाहिनी ।

प्राणिनां परमा शक्तिः सर्वशक्तिजवप्रदा ।। ४२

अनिशं निःश्वसद्रूपा रुषितेव भुजंगमी ।

संस्थितोर्ध्वीकृतमुखी स्पन्दनाहेतुतां गता ।। ४३

यदा प्राणानिलो याति हृदि कुण्डलिनीपदम् ।

तदा संविदुदेत्यन्तर्भूततन्मात्रबीजभूः ।। ४४

यथा कुण्डलिनी देहे स्फुरत्यब्ज इवालिनी ।

तथा संविदुदेत्यन्तर्मृदुस्पर्शवशोदया ।। ४५

स्पर्शनं मृदुनान्योन्यालिङ्गिका तत्र यन्त्रयोः ।

यथा संविदुदेत्युच्चैस्तथा कुण्डलिनी जवात् ।। ४६

तस्यां समस्ताः संबद्धा नाड्यो हृदयकोशगाः ।

उत्पद्यन्ते विलीयन्ते महार्णव इवापगाः ।। ४७

नित्यं पातोत्सुकतया प्रवेशोन्मुखया तया ।

सा सर्वसंविदां बीजं ह्येका सामान्युदाहृता ।। ४८

श्रीराम उवाच ।

आकल्पादनवच्छिन्ना चित्संवित्सर्वमस्ति हि ।

तस्मात्कुण्डलिनीकोशात्केनार्थेनोदयः स्फुटः ।। ४९

श्रीवसिष्ठ उवाच ।

सर्वत्र सर्वदा सर्वं चित्संविद्विद्यतेऽनघ ।

किंत्वस्या भूततन्मात्रवशादभ्युदयः क्वचित् ।। ५०

सर्वत्र विद्यमानापि देहेषु तरलायते ।

सर्वगोऽप्यातपः सौरो भित्यादौ वै विजृम्भते ।। ५१

क्वचिन्नष्टं क्वचित्स्पष्टं क्वचिदुच्छन्नतां गतम् ।

वस्तु वस्तुनि दृष्टं तत्तत्सद्भावैर्विजृम्भितम् ।। ५२

एतद्भूयः क्रमेणाहं शृणु वक्ष्यामि तेऽनघ ।

देहे स्वे च यथोदेति भृशं संविन्मयक्रमः ।। ५३

चेतनाचेतनं भूतजातं व्योम तथाखिलम् ।

सर्वं चिन्मात्रसन्मात्रं शून्यमात्रं यथा नभः ।। ५४

तद्धि चिन्मात्रसन्मात्रमविकारं स्वनामयम् ।

क्वचित्स्थितं संविदेव भूततन्मात्रपञ्चकम् ।। ५५

तत्पञ्चधा गतं द्वित्वं लक्षसे त्वं स्वसंविदम् ।

अन्तर्भूतविकारादि दीपाद्दीपशतं यथा ।। ५६

स्वसत्तामात्रकेणैव संकल्पलवरूपिणा ।

पञ्चकानि व्रजन्तीह देहत्वं तानि कानिचित् ।। ५७

कानिचित्तिर्यगादित्वं हेमादित्वं च कानिचित् ।

कानिचिद्देशतादित्वं द्रव्यादित्वं च कानिचित् ।। ५८

एवं हि पञ्चकस्पन्दमात्रं जगदिति स्थितम् ।

चित्संविदत्र सर्वत्र विद्यते रघुनन्दन ।। ५९

केवलं पञ्चकवशाद्देहादौ चेतनाभिधा ।

जडस्पन्दाभिधा क्वापि स्थावरादौ जडाभिधा ।। ६०
यथा स्तब्धः स्थितो वीचिरिव स्थलमिवास्थितः ।
पञ्चकेषु तथैतच्चिल्लोलरूपा जडान्विता ।। ६१
इतः सौम्य इतो लोलः किमब्धिरिति नो यथा ।
विकल्पादौ तथैवैतत्पञ्चकं हि जडाजडम् ।। ६२
देहादिपञ्चकं जीवः स्पन्दः शैलादिकं जडम् ।
स्थावराद्यनिलस्पन्दि स्वभाववशतोऽनघ ।। ६३
वाचः पर्यनुयोक्तव्याः स्वभावाद्रघुनन्दन ।
शीतोष्णादि हिमाग्न्यादि वाक्चेति परिदृश्यते ।। ६४
गृहीतवासनांशानां पुष्टाभावविकारिणाम् ।
स्थितयः पञ्चकानां हि योज्याः पर्यनुयोजने ।। ६५
वासनास्तु विपर्यस्ता इतो नेतुमितश्च ताः ।
पुंसा प्राज्ञेन शक्यन्ते सुखं पर्यनुयोजितुम् ।। ६६
अशुभे वा शुभे वापि तेन पर्यनुयोज्यते ।
प्रबुद्धवासनं चान्यत्पञ्चकं सुप्तवासनम् ।। ६७
यत्र पर्यनुयोगस्य फलं समनुभूयते ।
तत्र तं संप्रयुञ्जीत नाकाशं मुष्टिभिः क्षिपेत् ।। ६८
तृणाग्रनिष्ठा मेर्वाद्याः पञ्चकानां हि राशयः ।
विवेकनिष्ठाः कीटाद्या एते स्थावरजंगमाः ।। ६९
प्रसुप्तवासनाः केचिद्यथा स्थावरजातयः ।
प्रबुद्धवासनाः केचिद्यथा नरसुरादयः ।। ७०
सवासनाविलाः केचिद्यथैते तिर्यगादयः ।
प्रक्षिप्तवासनाः केचिद्यथैते मोक्षगामिनः ।। ७१
अथ स्वास्वेव संवित्सु मनोबुद्ध्यादिकाः कृताः ।
हस्तपादादिसंयुक्तैः संज्ञाः पञ्चकराशिभिः ।। ७२
तिर्यगादिभिरप्यन्यैरन्याः संज्ञाः प्रकल्पिताः ।

स्थावरादिभिरप्यन्यैरन्यान्याः संविदः कृताः ।। ७३

इति साधो स्फुरन्तीमे चित्राः पञ्चकराशयः ।

रूपैराद्यन्तमध्येषु चलाचलजडाजडैः ।। ७४

एषामेकोऽभिसंकल्पः परमाणुर्महीपते ।

बीजमाकाशवृक्षाणां सर्गाणां तेष्विमानि तु ।। ७५

इन्द्रियाणि च पुष्पादि विषयामोदवर्ति हि ।

इच्छाभ्रमर्यो राजन्त्यो मञ्जर्यश्चञ्चलक्रियाः ।। ७६

लोकान्तराणि स्वच्छानि गुल्मा मूलं समेरवः ।

पल्लवा नीलजलदा लता लोला दिशो दश ।। ७७

वर्तमानानि भूतानि भविष्यन्ति च यानि तत् ।

जयन्ति तान्यसंख्यानि फलानि रघुनन्दन ।। ७८

पञ्चबीजास्त एते हि राम पञ्चकपादपाः ।

स्वयं स्वभावाज्जायन्ते स्वयं नश्यन्ति कालतः ।। ७९

स्वयं नानात्वमायान्ति चिरं जाड्यात्स्फुरन्ति च ।

स्वविविक्ताः शमं यान्ति तरङ्गा इव वारिधौ ।। ८०

इतो यान्ति समुत्सेधमितो यान्ति शमं स्वयम् ।

एते जाड्यविवेकाभ्यां तरङ्गा इव तोयधौ ।। ८१

ये विवेकवशमालयं गता

राम पञ्चकविलासराशयः ।

तेन भूय इह यान्ति संस्थितिं

प्रभ्रमन्ति जगतीतरे मुहुः ।। ८२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० चू० पञ्चकविलासो नामाशीतितमः सर्गः ।। ८०।।